श्रीसुमतीन्द्रतीर्थविरचितः

भूगोलसंग्रहः

तथा

श्रीवादीन्द्रतीर्थविरचितं

भूगोलम्

गौरवसम्पादकाः

पण्डितकेसरी श्री राजा एस्. गिरि आचार्याः

प्रधानसम्पादकौ

विद्वान् श्री एस्. वि. भीमभट्टमहोदयः

विद्वान् श्री राजा एस्. पवमानाचार्यः

प्रकाशकः

अध्यक्षः

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीराघवेन्द्रस्वामिमठः

मन्त्रालयः–518345 A.P.

श्रीसुमतीन्द्रतीर्थविरचितः

भूगोलसंग्रहः

तथा

श्रीवादीन्द्रतीर्थविरचितं

भूगोलम्

गौरवसम्पादकाः

पण्डितकेसरी श्री राजा एस्. गिरि आचार्याः

प्रधानसम्पादकौ

विद्वान् श्री एस्. वि. भीमभट्टमहोदयः

विद्वान् श्री राजा एस्. पवमानाचार्यः

प्रकाशकः

अध्यक्षः

श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्

श्रीराघवेन्द्रस्वामिमठः

मन्त्रालयः-518345 A.P.

प्रथमावृत्तिः क्रि. श.—१९९६

१००० प्रतीकानि

पुस्तकप्राप्तिस्थानम्
अध्यक्षः
श्रीगुरुसार्वभौमसंस्कृतविद्यापीठम्
मन्त्रालयः - 518 345
कर्नूलमण्डलम्, आंध्रप्रदेशः

Books can be had fram :
President
Sri Gurusarvabhouma Sanskrit Vidyapeetham
Mantralaya-518 345
Kurnool District, A.P.
Telephone No. 4896 (STD. Code No. 085136)

मुद्रकः
डि. एस्. कृष्णाचार्यः
प्रभा मुद्रणालयः, बेंगळूरु-560 004

अनुग्रहवचनम्

❁

श्रीराघवेन्द्रगुरुसार्वभौमसिंहासनाधिष्ठितैरस्मत्पूर्वपुरुषैः
श्रीसुमतीन्द्रतीर्थवादीन्द्रतीर्थगुरुपुंगवै रचितमिदं
भूगोलयुगलात्मकं कृतिद्वयं प्रकटितवतः
अध्यक्षसंपादकमुद्रापकादीन् हरिवायुगुरवः
विशेषतोऽनुगृह्णन्त्विति
अस्मदुपास्यमूर्तिं संप्रार्थयामहे ।

मन्त्रालयः
4–3–1996

श्री १००८ श्रीसुशमीन्द्रतीर्थ श्रीपादाः
श्रीराघवेन्द्रस्वामिमठः
मन्त्रालयः

॥ श्रीमन्मूलरामो विजयते ॥

॥ श्रीराघवेन्द्रगुरुसार्वभौमो विजयते ॥

भूगोलसंग्रहविषये किञ्चित् प्रास्ताविकम्

अथात्र संप्रकाश्यते श्रीसुमतीन्द्रतीर्थविरचितः भूगोलसंग्रहनामा ग्रन्थतल्लजः। पुराणेषु विशेषतः भागवतपञ्चमस्कन्धे समुल्लिखितविषयान् संगृह्य मनोहर्या शैल्या ते ग्रन्थमिमरचयन्। तत्प्रशिष्याः श्रीवादीन्द्रतीर्थश्रीपादा अपि भूगोलखगोलसंग्रहात्मकमध्यायचतुष्टयपरिमितं ग्रन्थमकार्षुः। भागवतविष्णुपुराणाभ्यां संगृहीतविषयोपबृम्हितः ग्रंथोऽयं जिज्ञासूनां कुतूहलकारिण्या शैल्या प्रवर्तते। एवं ग्रन्थद्वयमिदं सज्जनानां करकमलयोः उपहारीकुर्वन्तः वयं नितरां संतोतुष्यामहे।

श्रीवादिराजतीर्थविरचितभूगोलग्रन्थमपहाय एतत्पूर्वमेतादृश भूगोलविषयकग्रन्थः नान्यैर्विरचितपूर्वः नास्माभिर्दृष्टपूर्वः इति वयमूहामहे। अतिगहनोऽयं यद्भूगोलनिरूपणं नाम। अल्पप्रज्ञैर्बोद्धुमशक्योऽयं तात्विकः धार्मिकः मार्मिकः विषयः जिज्ञासुजनबोधाय कृपालुभिरुभयश्रीपादैः संगृहीतः।

आधुनिकविज्ञानयुगेऽनेकसूक्ष्मदर्शकयन्त्रद्वारा सर्वान् विषयान् प्रत्यक्षीकुर्वन्तः, इदानीं विद्यमानस्य सर्वस्यापि भूभागस्य स्वतः संचारेण परिचयं प्राप्नुवन्तः आधुनिकाः वैज्ञानिकाः केवलं पुरातनवेदवेदानुसारिपुराणादिग्रन्थाधारेण लिखितेषु विषयेषु एषु

न विश्वासं प्राप्नुयुः । परन्तु अत्रोल्लिखिताः विषयाः, पुरातनैर्नारदादिभिः प्रत्यक्षीकृता एव । तत्रानेकानि वचनानि प्रमाणभूतानि विद्यन्त एव । एतादृगभिप्रायेणैव श्रीवादीन्द्रतीर्थश्रीपादाः

यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं च ऋषिभाषितम् ।
दूषयेदनभिज्ञाय स भवेद् ब्रह्मघातकः ॥

(भूगोलसंग्रहे अध्यायः ४, श्लोकः १, पुटं ३८) विषयेष्वेतेषु विश्वासरहितान् इदानीन्तनान् प्राज्ञंमन्यान् जनान् एतेन श्लोकेन जागरयन्ति उद्बोधयन्ति उपदिशंति च । नास्तिक्यबहुले चार्वाकप्रायेऽस्मिन्निदानींतनप्रपञ्चे बहूनां जनानामेतादृशोपदेशवाक्येनापि शास्त्रेषु दृढः प्रत्ययः नोत्पद्येतापि तथापि केषाञ्चिदेव सज्जनानामनेन ग्रन्थेनोपयोगः स्यादेव । आध्यात्मिके पारलौकिकप्रयोजनकेऽस्मिन् विषयेऽङ्गुलिगणेयानां सज्जनानां विश्वासः समुत्पद्येत चेत् तावता कृतार्था वयम् । सर्वत्र परीक्ष्या प्रयोगेण च विश्वासः प्रामाण्यबुद्धिश्चोत्पद्यते नान्यथा इति वदन्तः आधुनिका अपि प्रामाणिकाः एतद्ग्रन्थपरिशीलनेन अस्माकं प्राचीनानां बुद्धिवैभवविषये, एतद् ग्रन्थकर्तृषु गौरवमादरं च प्राप्नुयुः, तेषामपि विषयोऽयमस्माभिः पुनः पुनर्विमर्शनीयः इति धिषणा जागृयात् । भावनयैतया, दृढतरया चास्मात्पूर्वपुरुषाणां मुख्यप्राणमतानुसर्तॄणां भाषितेषु प्रामाण्यबुद्ध्या च ग्रन्थोऽयं प्राकाशि । तदिदं ग्रन्थद्वयं प्रकाशनीयमिति श्रीपादद्वयानुज्ञया कार्यप्रवृत्तैरस्माभिः मंत्रालयस्थश्रीपादपुत्रपंडितकेसरि गिर्याचार्याणां सकाशादेकां मूलमातृकां, श्रीगुरु-

सार्वभौमसंस्कृतविद्यापीठतः मन्त्रालयस्थात् अन्यां च मूलमातृकामुपलभ्य ग्रन्थोऽयं संशोधितः प्रकाशितश्च । अत्र विद्वद्वर श्रीप्रभञ्जनाचार्याः श्रीवादीन्द्रतीर्थविरचितभूगोलसंग्रहमातृकामप्येकां प्रदाय समुपाकुर्वन्, तेषामपि हार्दीं कृतज्ञतामावेदयामः ।

एतद्ग्रन्थस्य शुद्धप्रतिलेखने व्यापृतानां विद्वान् कडपाराघवेन्द्राचार्याणां श्रमः स्मरणीयोऽस्ति, तेषामन्येषां च सहायकर्तॄणां मुद्रणकर्तॄणां च भगवान् सकलमैहिकमामुष्मिकं च प्रेयः श्रेयश्च सन्तन्यादिति संप्रार्थयामहे ।

इत्थम्
संपादकमंडली
वेदान्तकेसरी **राजा एस्. सुज्ञानेन्द्राचार्याः**
अध्यक्षाः
विद्वान् एस. वि. भीमभट्टमहोदयः
विद्वान् राजा एस्. पवमानाचार्यः
संपादकौ

मंत्रालयक्षेत्रम्
युवसंवत्सरीय फाल्गुण
होलिका पूर्णिमा
कलिवर्षम ५०९७
3–3–1996


वि.सू. :– विद्वत्तल्लजाः श्री प्रभंजनाचार्याः श्री सुमतीन्द्रतीर्थीय भूगोलसंग्रहमातृकामप्येकां प्रदायोपकृतवन्तः। एवमिदानीमिव पूर्वमिव च उत्तरत्राप्यस्मभ्यं मूलमातृकाप्रदानादिना सर्वविधं साहाय्यं करिष्यन्तीत्याशास्महे ।

श्रीराघवेन्द्रतीर्थगुरुसार्वभौमाः




श्रीमतो राघवेन्द्रस्य नमामि पदपङ्कजे ।
कामिताशेषकल्याणकलनाकल्पपादपौ ॥

श्रीवादीन्द्रतीर्थ गुरुसार्वभौमाः



वन्दारुजनसन्दोहमन्दारतरुसन्निभम् ।
वृन्दारकगुरुप्रख्यं वन्दे वादीन्द्रदैशिकम् ॥

श्रीसुमतीन्द्रतीर्थगुरुसार्वभौमाः



पूर्णप्रज्ञमताम्भोधिपूर्णेन्दुमकलङ्किनम् ।
सुजनाम्बुजभास्वन्तं सुमतीन्द्रगुरुं भजे ॥

श्रीसुजयीन्द्रतीर्थश्रीपादाः



सुयमीन्द्रकराब्जोत्थं सुविद्याबोधकं सदा ।
सुमूलरामपूजाढ्यं सुजयीन्द्रगुरुं भजे ॥

॥ श्रीः ॥

भूगोलसंग्रहः

श्रीसुमतीन्द्रतीर्थविरचितः

श्रीवेदव्यासमानम्य सर्वज्ञाचार्यवर्त्मना ।
सुमतीन्द्रो यतिरहं वच्मि भूगोलसम्पदम् ॥

जम्बूद्वीपो वर्तुलाकारः नवखण्डात्मकः मध्ये इलावृतखण्डः तस्य पूर्वभागे भद्राश्वखण्डः पश्चिमभागे केतुमालखण्डः, दक्षिणतः हरिवर्ष-किम्पुरुष-भारत-नामानः त्रयः खण्डाः उत्तरतः रम्यक-हिरण्मयकुरुनामानः त्रयः खण्डाः एवं नवखण्डाः । तत्र इलावृत-खण्डमध्ये मेरुः कनकमयो गिरिः लक्षयोजनोच्छ्रितः भूमेरधः मूलेन षोडशसहस्रयोजनात्मा प्रविष्टः । मूले षोडशसहस्रविशालः । भूमेरुपरि चतुरधिकाशीतिसहस्रयोजनोन्नतः मूर्ध्नि द्वात्रिंशत्सहस्र-योजनविस्तृतः तत्र मध्यदेशः । सहस्रयोजना ब्रह्मपुरी तटकोटि-समचतुरस्रा तन्मध्ये अमर(अम्बर)गङ्गा अवतीर्णा । चतुर्धा आत्मानं विभज्य सीता अलकनन्दा चक्षुर्भद्रेति नामवती पूर्वादि-चतुर्दिक्षु समुद्रं प्रविशति । ब्रह्मपुर्याः प्राच्याद्यष्टदिक्षु इन्द्राद्यष्ट-दिक्पालपुर्यः प्रत्येकं सार्धद्विसहस्रयोजनपरिमिताः मेरोः मूलदेशे प्राच्यादिचतुर्दिक्षु कुरङ्गः कुररः कुसुम्भः वैकङ्कत्रिकूटशिखर-पतङ्गरुचकनिषधशिखिवासकपिलशङ्खवैडूर्यजारुधिहंसवृषभनाग-

कालाञ्जननारदादिनामानः केसरपर्वताः उपक्लृप्ताः । मेरोः पूर्वदेशे मन्दरः दक्षिणभागे मेरुमन्दरः पश्चिमभागे सुपार्श्वः उत्तरभागे कुमुद इति चत्वारोऽवष्टम्भगिरयः प्रत्येकमयुतयोजनविस्तारोन्नाहाः । चतुर्ष्वेतेषु चूतजम्बूकदम्बन्यग्रोधाः चत्वारः पादपप्रवराः पर्वतकेतव इव एकादशशतयोजनोन्नाहाः तावद्विटपविततयः । शतयोजनपरिणाहाः ह्रदाः चत्वारः । पयोमध्विक्षुरसमृष्टजलाः यदुपस्पर्शिनः उपदेवगणाः योगैश्वर्याणि स्वाभाविकानि धारयन्ति । तेषु देवोद्यानानि चत्वारि नन्दनं चैत्ररथं वैभ्राजकं सर्वतोभद्रमिति । मेरोः पूर्वभागे जठरगिरिः देवकूटगिरिश्च प्रत्येकमादक्षिणोत्तरमष्टादशसहस्रयोजनायामः द्विसहस्रयोजनोत्सेधः तावत्पृथुलश्च इमौ परिस्तरणपर्वतौ दक्षिणस्यां दिशि कैलासकरवीरौ, इमावपि परिस्तरणपर्वतौ जठरदेवकूटसमपरिमाणौ । पश्चिमायां दिशि पवनपारियात्रौ, इमावपि परिस्तरणरूपौ जठरदेवकूटसमपरिमाणौ, उत्तरस्यां दिशि शृङ्गिमकरौ, इमौ परिस्तरणरूपौ जठरदेवकूटसमपरिमाणौ । इलावृतखण्डः समचतुरस्रः । अत्र उमापतिः सङ्कर्षणश्च स्तः । चतुस्त्रिंशत्सहस्रयोजनायामः । आपूर्वपश्चिमः एकत्रिंशत्सहस्रयोजनविस्तृतः गन्धमादनगिरिः इलावृतभद्राश्वयोर्मर्यादारूपः आनीलनिषधायामः द्विसहस्रयोजनपृथुलः अयुतयोजनोच्छ्रयः भद्राश्वखण्डः आपूर्वपश्चिमः एकत्रिंशत्सहस्रयोजनायामः । आदक्षिणोत्तरं चतुस्त्रिंशत्सहस्रयोजनविशालः, अत्र हयग्रीवोऽस्ति । निषधगिरिः इलावृतहरिवर्षयोर्मर्यादारूपः, अयुतयोजनोच्छ्रितः द्विसहस्र-

योजनपृथुलः पूर्वपश्चिमसमुद्रावधिः हरिवर्षनामा खण्डः आदक्षिणोत्तरं नवसहस्रयोजनायामः । पूर्वपश्चिमसमुद्रावधिः । अत्र नरसिंहस्तिष्ठति । [1]हेमकूटगिरिः किम्पुरुषहरिवर्षयोर्मर्यादारूपः अयुतयोजनोत्सेधः द्विसहस्रयोजनपृथुलः पूर्वपश्चिमसमुद्रावधिः । किंपुरुषखण्डः आदक्षिणोत्तरं नवसहस्रयोजनायामः । अत्र रामः अस्ति । हिमाचलः भरतकिंपुरुषयोर्मर्यादारूपः अयुतयोजनोत्सेधः द्विसहस्रयोजनपृथुलः पूर्वपश्चिमसमुद्रावधिः भरतखण्डः आदक्षिणोत्तरं नवसहस्रयोजनविस्तारवान् । अत्र सिंहाद्रिमलयाचलवेङ्कटाचलश्रीशैलादिगिरयः, ताम्रपर्णी कृतमाला कावेरी, कृष्णवेणी, गोदावरी गंगाद्या नद्यश्च सन्ति । अनन्तशयनजनार्दनतोताद्रिश्रीरङ्गधामरामेश्वर, दक्षिणद्वारका, कुम्भकोण, श्रीकृष्ण, प्रयाग, काशी, बदरिकाश्रमादोनि क्षेत्राणि सन्ति । अत्र नरनारायणस्तिष्ठति । माल्यवान् गिरिः इलावृतकेतुमालयोर्मर्यादारूपः गन्धमादनसमपरिमाणः केतुमालखण्डः भद्राश्वखण्डसमपरिमाणः । अत्र मन्मथो रतिर्देवी च स्तः । नीलगिरिः इलावृतरम्यकयोर्मर्यादाचलः पूर्वपश्चिमसमुद्रान्तः अयुतयोजनोन्नतः द्विसहस्रयोजनपृथुलः । रम्यकनामा खण्डः आदक्षिणोत्तरं नवसहस्रयोजनविस्तारः पूर्वपश्चिमसमुद्रावधिः । अत्र मत्स्यरूपी भगवानस्ति । श्वेतगिरिः रम्यकहिरण्मययोर्मर्यादरूपः पूर्वपश्चिमसमुद्रान्तः अयुतयोजनोन्नतः द्विसहस्रयोजनपृथुलः हिरण्मयखण्डः । आदक्षिणोत्तरं नवसहस्र-

---

1. देवकूटगिरिः इति पाठः ।

योजनविस्तारः विशालः पूर्वपश्चिमसमुद्रावधिः । अत्र कूर्मः तिष्ठति । शृङ्गवान् गिरिः । हिरण्मयकुरुखण्डयोर्मर्यादारूपः । पूर्वपश्चिमसमुद्रान्तः । अयुतयोजनोन्नतः । द्विसहस्रयोजनपृथुलः । उत्तरकुरुखण्डः । आदक्षिणोत्तरं नवसहस्रयोजनविशालः । पूर्वपश्चिमसमुद्रावधिः । अत्र वराहस्तिष्ठति । अत्र लवणसमुद्रः लक्षयोजनविस्तृतः जम्बूद्वीपं परितो वलयाकृतिरस्ति। प्लक्षदीपः द्विलक्षयोजनविस्तारः लवणसमुद्रं परितो वलयाकृतिः, द्वीपख्यातिकरः प्लक्षवृक्षोऽत्रास्ति । अयं च द्वीपः सप्तखण्डात्मकः शिवः खण्डः तत्र तन्नामा राजा मणिकूटनामा मर्यादागिरिः । अरुणा नदी । यशस्यः खण्डः । तत्र तन्नामा राजा वज्रकूटो गिरिः नृगणा नदी सुभद्रनामा खण्डः । तत्र तन्नामा राजा । इन्द्रसेनो गिरिः । आङ्गीरसी नदी । [1]शन्तनामा खण्डः । तत्र तन्नामा राजा । ज्योतिष्मान् गिरिः सावित्री नदी । क्षेमनामा खण्डः, तत्र तन्नामा राजा, धूम्रवर्णो गिरिः सुप्रभाता(सा)नदी अमृतः खण्डः तत्र तन्नामा राजा, हिरण्यग्रीवो गिरिः ऋतम्भरा नदी । अभयः खण्डः तत्र तन्नामा राजा मेघमालो गिरिः सत्यम्भरा नदी, इक्षुरससमुद्रः द्विलक्षयोजनपरिमितः प्लक्षद्वीपं परितो वलयाकृतिः । शाल्मलीद्वीपः चतुर्लक्षयोजनविस्तृतः इक्षुरससमुद्रं परितो वलयाकृतिः, शाल्मलीवृक्षो द्वीपख्यातिकरोऽत्रास्ति । अयमपि सप्तखण्डात्मकः, सुरोचनः खण्डः, तत्र तन्नामा राजा, सुरसो गिरिः अनुमतिर्नदो सौमनस्य

1. शान्तनमिखण्डः इति पाठः ।

नामा खण्डः तत्र तन्नामा राजा, शतशृङ्गो गिरिः, शिनीवाली नदी रमणकः खण्डः, तत्र तन्नामा राजा नामदेवो गिरिः सरस्वती नदी, देवबर्हनामा खण्डः तत्र तन्नामा राजा, कुमुदो गिरिः कुहु(हू)र्नदी। पारिभद्रः खण्डः, तत्र तन्नामा राजा, कुमुदो गिरिः रजनी नदी, अहिबर्हः खण्डः, तत्र तन्नामा राजा, पुष्पवर्षो(र्णो) गिरिः नन्दा नदी, आप्यायनः खण्डः, तत्र तन्नामा राजा सहश्रुतिगिरिः राका नदो सुरासमुद्रः चतुर्लक्षयोजनविस्तृतः परितः शाल्मली द्वीपं वलयाकृति[1] विस्तृतः ।

कुशद्वीपः—अष्टलक्षयोजनविस्तृतः परितः सुरासमुद्रः वलयाकृतिः, अयमपि सप्तखण्डात्मकः, वसुधानखण्डः तत्र तन्नामा राजा चक्रनामा गिरिः रसकुल्या नदी ॥ १ ॥ दृढरुचिनामा खण्डः, तत्र तन्नामा राजा, कपिलो गिरिः मधुकुल्या नदी ॥ २ ॥ नाभिनामा खण्डः, तत्र तन्नामा राजा, शृङ्गनामा गिरिः श्रुतिविन्दा नदी ॥ ३ ॥ शुकनामा खण्डः तत्र तन्नामा राजा, छन्नकूटो गिरिः, मित्रविन्दा नदी ॥ ४ ॥ सत्यव्रतनामा खण्डः, तत्र तन्नामा राजा, देवानीको गिरिः देवगर्भा नदो ॥ ५ ॥ विपनामा खण्डः, तत्र तन्नामा राजा, नुर्धरोमा गिरिः घृतच्युता नदी ॥ ६ ॥ वामदेवनामा खण्डः तत्र तन्नामा राजा, द्रविणनामा गिरिः[2] तत्र[3] माला नदी ॥ ७ ॥ अस्मिन् द्वीपे द्वीपख्यातिकरः कुशस्तम्बो-

1. वलयाकृतिः स्थितः

2. (मन्त्रमाला गिरिः) 3. मन्त्रमाला नदी

ऽस्ति घृतसमुद्रः अष्टलक्षयोजनविस्तारः विस्तृतः परितः कुशद्वीपं वलयाकृतिः। तत्र क्रौञ्चद्वीपः, षोडशलक्षयोजनविस्तृतः, घृतसमुद्रं परितो वलयाकृतिः। अत्र क्रौञ्चगिरिः द्वीपख्यातिकरोऽस्ति, अयमपि सप्तखण्डात्मकः। आमनामा खण्डः, तत्र तन्नामा राजा, शुक्लो गिरिः। अमृता नदी ॥ १ ॥ मृदुहेमनामा खण्डः तत्र तन्नामा राजा, वर्धमानो गिरिः उभयेष्या[1] नदी ॥ २ ॥ मेष (तृप्तः) पृष्ठः खण्डः, तत्र तन्नामा राजा, उपबर्हणाख्यो गिरिः आर्यका नदी ॥ ३ ॥ सुधामनामा खण्डः, तत्र तन्नामा राजा उपभोजनो गिरिः तीर्थवती नदी ॥ ४ ॥ ऋषिज्यः खण्डः, तत्र तन्नामा राजा, नन्दाख्यो गिरिः। तृ(सु)प्तिरूपवती नदी ॥५॥ लोहितार्णः खण्डः, तत्र तन्नामा राजा, नन्दाख्यो गिरिः, पवित्रवती(पवित्रा)नदी ॥६॥ वनस्पान्तः[2] खण्डः, तत्र तन्नामा राजा, सर्वभद्राख्यो गिरिः, शुकवती नदी ॥ ७ ॥ दधिसमुद्रः षोडशलक्षयोजनविस्तृतः परितः क्रौञ्चद्वीपं वलयाकृतिः ॥

शाकद्वीपः—द्वात्रिंशल्लक्षयोजनविस्तृतः दधिसमुद्रं परितो वलयाकृतिः, अत्र द्वीपख्यातिकरः शाकवृक्षोऽस्ति। अयमपि सप्तखण्डात्मकः। परोजवः खण्डः, तत्र तन्नामा राजा, ईशानाह्वयो गिरिः, अनघा नदी ॥ १ ॥ मनोजवः खण्डः, तत्र तन्नामा राजा, उरुशृङ्गाख्यो गिरिः। युवा नदी ॥ २ ॥ वेपमानाख्यः खण्डः, तत्र तन्नामा राजा, बलभद्राख्यो गिरिः उपस्पर्शा[3] नदी ॥ ३ ॥

1. उभयोष्या 2. वनस्पतिः 3. उपस्तृष्टिः इति पाठः

धूम्रानीकः खण्डः, तत्र तन्नामा राजा, शतकेसरो गिरिः, अपराजिता नदी ॥ ४ ॥ चित्ररेफः खण्डः, तत्र तन्नामा राजा, सहस्रस्रोता गिरिः, पञ्चपदी नदी ॥ ५ ॥ बहुरूपः खण्डः, तत्र तन्नामा राजा, देवपालाख्यो गिरिः, सहश्रुतिर्नदी ॥ ६ ॥ विश्वधरः खण्डः, तत्र तदाख्यो[1] राजा, महानसाह्वयो गिरिः, निरुजाधृतिर्नदी ॥ ७ ॥

क्षीरसमुद्रः द्वात्रिंशल्लक्षयोजनविस्तृतः, शाकद्वीपं परितो वलयाकृतिः तिष्ठति, एतन्मध्ये श्वेतद्वीपः परितो वलयाकृतिः ॥

ततः **पुष्करद्वीपः**—चतुःषष्टिलक्षयोजनविस्तृतः, क्षीरसमुद्रं परितो वलयाकृतिः। अत्र कनकपत्रायुतायतं[2] पुष्करं चतुराननस्य आसनरूपं द्वीपख्यातिकरमस्ति। एतद्द्वीपमध्ये मानसोत्तरपर्वतः परितो वलयाकृतिः बाह्याभ्यन्तरयोः खण्डयोर्मर्यादापर्वतः, (रूप) तत्रान्तरे[3] रमणकः खण्डः, तत्र तदभिधानो राजा, बहुपोधातकः खण्डः तत्र तदाह्वयो राजा, अत्रैव मानसोत्तरपर्वते रविरथचक्रं परिभ्रमति। पूर्वस्यां दिशि पुरन्दर(चन्द्र)पुरी दक्षिणस्यां दिशि वैवस्वतपुरी, प्रतीच्यां दिशि वरुणपुरी, उदीच्यां दिशि कुबेरपुरी, ततः शुद्धोदकसमुद्रः। चतुःषष्टिलक्षयोजनविस्तृतः, परितः पुष्करद्वीपं वलयाकारसंस्थितः। ततः काञ्चनभूमिः षडधिकनवतिलक्षयोजनविस्तारा,

1. तन्नामा 2. कनकपत्रायुताधूतं (पाठान्तरम्)
3. तत्रान्तरः पाठान्तरम्

बाह्यतो वज्रखचिता, परितो वलयाकृतिः, ततः परस्ताल्लोका-लोकाचलः। सार्धपञ्चाशल्लक्षयोजनविस्तारवान्, परितो वलयाकृतिः, अत्र पूर्वभागे ऋषभनामा दिग्गजोऽस्ति, दक्षिणभागे पुष्कर-चूडाख्यः, पश्चिमभागे वामननामा, उत्तरभागेऽपराजितनामा दिग्गजोऽस्ति। ततः परमंधतमसं लक्षोनसप्तकोटियोजनविस्तृतं, ततः परं घनोदकम्। द्विलक्षोनचतुर्दशकोटिविशालम्। ततोऽनन्ता-सनं त्रिंशल्लक्षयोजनविस्तीर्णं वलयाकृति, ततः परं ब्रह्माण्डभित्तिः स्वर्णमयी॥

अथ ब्रह्माण्डबहिर्गतान्यावरणान्युच्यन्ते। तत्र पृथिवी शत-कोटियोजनविस्तृता, आपः पृथिव्यपेक्षया दशगुणोत्तराः, तेजः अद्भ्यः दशगुणोत्तरम्, वायुस्तेजोदशगुणोत्तरः, आकाशं वायुदशगुणोत्तरम्। अहङ्कारतत्त्वम् आकाशाद्दशगुणोत्तरम्, महत्तत्त्वमहङ्काराद्दशगुणो-त्तरम्, तमोगुणः महत्तत्वाद्दशगुणोत्तरः, रजोगुणः तमोगुणाद्दश-गुणोत्तरः सत्त्वगुणः रजोगुणाद्दशगुणोत्तरः। एवं ब्रह्माण्डस्य पृथिव्यादीनि दशावरणानि परितः सन्ति। इति सावरणब्रह्माण्ड-स्थितिः।

गालव उवाच—

अनन्तासनवैकुण्ठनारायणपुराणि तु। त्रीणि धामानि वै विष्णोः कुत्र सन्तीति तद्वद॥ कथं भोगाः प्रजायन्ते सर्वदोष-विवर्जिते। स्थानत्रये तु मुक्तानां निर्दोषाणां स्वभावतः॥

क्षुधां विना कथं भक्ष्यं कथं पानं तृषां विना।
कामोद्रेकं विना भोगः कथं स्त्रीणां प्रजायते॥

क्षुधादयो यतो दोषाः निर्दोषाः स्युः कथं मुने।
अविनाशिनि तत्स्थाने फलपुष्पादयः कथं नुते॥

भुज्यन्ते वाथवेच्छैक्यं कथं स्याद्भोक्तृभोग्ययोः।
स्त्रीपुंसयोर्वाहनानां गजादीनां च सर्वशः॥

इच्छाभेदे कथं सौख्यं इच्छैक्यं सर्वदा कथम्।
एतन्नो विस्तराद्ब्रूहि व्यासशिष्योऽसि सर्ववित्॥

सूत उवाच—

ब्रह्माण्डस्यापि विस्तारः पञ्चाशत्कोटियोजनः।
मध्यभागे तस्य मेरुः लक्षयोजनमुच्छ्रितः॥

अधः षोडशसाहस्रयोजनात्तस्य विस्तृतिः।
द्वात्रिंशद्योजनायामा शिरोविस्तृतिरुच्यते॥

तन्मध्यभागमारभ्य यावद्ब्रह्माण्डखर्परम्।
विस्तारो दशकाष्ठासु पञ्चविंशतिकोटयः॥

जम्बूद्वीपोऽभितो मेरुः पञ्चायुतमितः स्मृतः।
लक्षयोजनविस्तार एवं द्वीपोऽयमुच्यते॥

प्लक्षादिद्वीपषट्कं तु क्रमाद्द्विगुणितं मतम्।
परितो वलयाकाराः सप्तानां सप्तसिन्धवः॥

लवणेक्षुसुरासर्पिर्दधिक्षीराम्बुपूरिताः ।
तत्र क्षीराब्धिमध्ये तु द्वात्रिंशल्लक्षयोजने ॥

श्वेतद्वीपो हरेर्लोको द्विशतायुतयोजनः ।
शाकद्वीपं समारभ्य परितो वलयाकृतिः ॥

षड्लक्षयोजनोत्सेधस्तद्भूभागः प्रकीर्तितः ।
श्रीभागः परतस्तस्य दुर्गाभागोऽपि तत्परः ॥

सप्तमाज्जलधेः पारे तदध्यर्धा सुवर्णभूः ।
तावल्लोक इति प्रोक्तो भानुरश्मिविलोकनात् ॥

अलोकः परतस्सूर्यलोकाभावेन मूर्तितः ।
अलोकलोकयोर्मध्ये लोकालोको महाचलः ॥

पञ्चाशल्लक्षविस्तारो लक्षद्वयसमुच्छ्रयः ।
पञ्चायुतमितास्तस्योभयतोऽधित्यका मताः ॥

लोकालोकात्तु परतो लोकाद् द्विगुणितं तमः ।
परतो द्विगुणं तस्मात् घनोदकमिति स्मृतम् ॥

दध्याकारं जलं तत्तु नानाद्वीपसमाकुलम् ।
येषां मणिप्रकाशेन तमसो नास्ति सम्भवः ।
तत्पारे खर्परं यावदनन्तासनमुच्यते ॥

लक्षत्रयं योजनानां विस्तृतं वलयाकृतिः ।
श्रीभूदुर्गात्मका भागाः तत्रापि परतः स्थिताः ॥

एवं स्थानद्वयं विष्णोः भूमिष्ठमिव दृश्यते ।
अधस्ताद्भूमिनाशेऽपि तदनश्यद्धि तिष्ठति ॥

भूदुर्गाभागयोस्तत्र भूमिनाशे प्रणश्यति ।
श्रीभागो नित्य एवास्ति मुक्तैरेव निषेवितः ॥

पृथिवीलोकतोऽधस्तात् यावद्ब्रह्माण्डखर्परम् ।
पञ्चविंशतिकोट्यस्तु योजनानां प्रकीर्तितम् ॥

तत्पञ्चाशत् त्रयं तोयं पञ्चाशद्द्वितयं दलम् ।
तत्र मग्नं मेरुमूलं सहस्राणि च षोडश ॥

समुद्रास्तत्र सप्तापि गम्भीरा विस्तृतेः समम् ।
कोटियोजनगम्भीरं तत्रैव च घनोदकम् ॥

घनोदकादधस्तात्तु भूदलं कोटियोजनम् ।
कोटौ कोटौ ततोऽधस्तात् ज्ञेयं पातालसप्तकम् ॥

ततोऽप्यधस्तात्सप्तापि नरका रौरवादिकाः ।
लक्षद्वादशकं तत्र प्रत्येकं नरकान्तरम् ॥

अधस्तात्सर्वतो भूमेः दलं षोडशलक्षकम् ।
ततोऽधोऽप्यतिगम्भीरे जले साक्षाद्धरिस्स्वयम् ॥

आधारशक्तिसंयुक्तो नानारूपैः प्रदीप्यते ।
भूदले लक्षतोऽधस्तात् तिष्ठन्ति जलदेवताः ॥

तत्रास्ति वारुणो लोको नानाभोगसमन्वितः ।
सुवर्णनलिनीप्रायः पूर्णप्रायोऽम्बुनिर्झरैः ॥

*

भूलोकादूर्ध्वतो मेरुः छत्राकारः सुरालयः ।
चतुराशीतिसाहस्रो नानोद्यानविराजितः ॥

गन्धर्वैः देवताभिश्च स्थाने स्थाने सदान्वितः ।
परितस्तु चतुष्कोणमिलावृतमुदीरितम् ॥

प्रत्येकं तच्चतुर्दिक्षु नवसाहस्रविस्तृतम् ।
माल्यवान् पश्चिमे तत्र पूर्वतो गन्धमादनः ॥

केतुमालं च भद्राश्वं क्रमात्खण्डे तयोः परे ।
एकत्रिंशत्सहस्राणि प्रत्येकं दीर्घता तयोः ॥

चतुस्त्रिंशत्सहस्राणि विस्तारोऽपि तयोः स्मृतः ।
निषधो हेमकूटश्च हिमालय इति त्रयः ॥

हरिवर्षं किम्पुरुषं भारतं चेति दक्षिणे ।
क्रमात्खण्डत्रयं चोक्तं यावल्लवणवारिधिः ॥

नीलः श्वेतश्च शृंगी च उत्तरेऽवधिपर्वताः ।
रम्यं हिरण्मयं चैव कुरुवर्षमिति त्रयम् ॥

खण्डानां यावदंबोधिविस्तृतानि महर्षयः ।
प्रत्येकं खण्डषट्कं तु नवसाहस्रयोजनम् ॥

मर्यादापर्वतानां तु अष्टानामपि विस्तृतिः ।
द्विसहस्रं योजनानां प्रत्येकं परिकीर्तिताम् ॥

द्वीपेष्वन्येषु खण्डानि प्रत्येकं सप्त सप्त तु ।
खण्डद्वयं पुष्करस्य नवखण्डमिदं स्मृतम् ॥

भुवर्लोकस्तु भूलोकादूर्ध्वतो लक्षयोजनः ।
महेन्द्रनगरी तस्मात् पञ्चाशल्लक्षयोजना ॥

तदध्यर्धः स्वर्गलोकः ततोऽध्यर्धाः परे स्मृताः ।
महर्जनस्तपश्चेति सप्तलोकास्तदूर्ध्वतः ॥

भूलोकात्तु तपो यावद्वैकुण्ठं सप्ततः परम् ।
यावदण्डकटाहं तदूर्ध्वमूर्ध्वव्यवस्थितम् ॥

मध्यभागःश्रियस्तत्र स तु लोकः सनातनः ।
मुक्ता एव रमन्तेऽत्र पुनरावृत्तिवर्जिताः ॥

भूदुर्गाभागकौ तत्र दक्षिणोत्तरतःस्थितौ ।
आराधितोऽस्ति यैर्विष्णुर्नानापुण्योच्चयैर्नरैः ॥

निवसन्ति त एवात्र क्षीणे पुण्ये पतन्त्यधः ।
संसारे पूर्वसंस्कारत् श्रीविष्णुं श्रवणादिना ।
आराध्य दृष्टबिम्बास्ते मुक्ता मोदन्ति सर्वदा ॥

अरण्याख्यौ सुधासिंधू विष्णोर्लोकत्रयेऽपि हि ।
सीमाविभाजकौ तौ तु भूदुर्गाभागयोः क्रमात् ॥

श्रीभागः शुद्धसत्वात्मा मुक्तैरेव निषेवितः ।
यथायथैव मुक्तेच्छा फलं पुष्पादिकं तथा ।
सत्वतो जायते शीघ्रं इच्छांते तत्र लीयते ।
तरङ्गा इव तोयेषु तदात्मानोऽपि तल्लयाः ॥

तथैव सत्वतः सर्वं दृश्यते लीयतेऽपि च ।
कामोद्रेकः क्षुधा तृष्णा गुणस्स्याद्विषये सति ॥

तदभावे तु दोषः स्यान्न दोषस्तत्र विद्यते ।
सिद्धं स्यादिच्छयैवेष्टं तत्र दोषः कथं भवेत् ॥

यतंते क्षुत्तृषादीनां वृद्धौ सम्पन्नभोगकाः ।
अत एव न ते दोषास्तत्र सन्तोऽपि सर्वथा ॥

स्त्रीपुंसभर्तृकादीनां इस्त्यैक्यं तत्र सर्वदा ।
स्वभावादेव मुक्तानां नेच्छाभेदः कथंचन ॥

नासूया नाप्यवज्ञानं नोचानामधिकेषु हि ।
निर्दोषत्वादतः श्रेष्ठो विष्णुलोकः सनातनः ॥

विमुक्ताः द्विविधाः प्रोक्ताः पुनरावृत्तिवर्जिताः ।
सात्त्विका विष्णुलोकस्थास्तामसास्तमसि स्थिताः ॥

लोकालोकात्परे भागे लोको यावद्घनोदकम् ।
तावत्तमो भवेन्नित्यं न तत्स्थानान्निवर्तनम् ॥

विष्णोर्भक्त्या विष्णुलोको तद्द्वेषात्तमसि स्थितिः ।
नित्यानन्दो विष्णुलोको नित्यदुःखं तमः स्मृतम् ॥

अतो नित्यसुखप्राप्त्यै नित्यदुःखनिवृत्तये ।
उपास्यः सर्वदा विष्णुः न द्वेष्यः कर्हिचिद्भवेत् ॥

तेनेहामुत्र कल्याणं विन्दते नान्यथा नराः ।
गतिद्वयविहीनास्स्यू राजसाः संसृतिस्थिताः ॥

परिवर्तयते नित्यमेवं जीवान् स केशवः ।
आद्यो मायासमायुक्तः क्षेत्रज्ञः पुरुषोत्तमः ॥

सेव्यो नित्यं वन्दनीयः नित्यं श्राव्यः स एव च ।
ध्येयः साक्षात्कार्य एषः विष्णुर्नित्यसुखेप्सुभिः ॥

एवं वः कथितं विप्राः यद्यत्पृष्टं च मां प्रति ।
यच्छ्रुत्वा पुरुषार्थेषु श्रोतव्यं नावशिष्यते ।

इति विष्णुरहस्ये एकोनचत्वारिंशोऽध्यायः ॥[1]

भूमेरधः अतललोकः कोटिद्वययोजनः । तदधस्ताद्वितललोकः कोटियोजनः । तदधस्तात्सुतललोकः कोटियोजनः । तदधस्तात्तलातललोकः कोटियोजनः । तदधस्तान्महातललोकः कोटियोजनः । तदधस्ताद्रसातललोकः कोटियोजनः । तदधस्तात्पाताललोकः कोटियोजनः । तदधस्तान्नरकलोकः कोटियोजनः । स च रौरवमहारौरवकुम्भीपाक असो(सि)पत्रवनपूयशोणितमुद्गरतप्तवालुकभेदेन सप्तविधः । प्रत्येकमधोऽधः द्वादशलक्षयोजनवि(स्त)रः । आहत्य सप्तनरकाः चतुरधिकाशीतिसप्तयोजनाः ।

तदधः भूखण्डः षोडशलक्षयोजनपरिमितः । तदधस्तात् गर्भोदकम्, पञ्चदशकोटियोजनम् । आहत्य भूमेरधः पञ्चविंशतिकोट्यः सम्पद्यन्ते । एतत्सर्वं वराहपुराणे उक्तम् ।

1. विष्णुरहस्ये एकोनचत्वारिंशदध्यायस्थाः त्रिषष्टिश्लोकाः ॥ एते श्लोका आनुपूर्व्यव्यत्यासं विना अत्रोदाहृताः ॥

नृसिंहपुराणे त्रिंशेऽध्याये भूगोलवर्णनप्रस्तावे ।

[1]ब्रह्मलोकाद्विष्णुलोको द्विगुणोऽयं व्यवस्थितः ।
वाराहे तस्य माहात्म्यं कथितं लोकचिन्तकैः ॥
[2]ततःपरं द्विजश्रेष्ठ ततोऽल्पं लोकपालक''मिति ॥

विष्णुपुराणे द्वितीयांशे पञ्चमाध्याये अतलादिलोकानां वर्णा उक्ताः

[3]शुक्ला कृष्णाऽरुणा पीता शर्कराशैलकाञ्चनाः ।
भूमयो यत्र मैत्रेय वरप्रासादशोभिताः ॥ इति ॥

ऋषय ऊचुः—

सूतसुव्यक्तमखिलं कथितं शंकरस्य तु ।
सर्वात्मभावं रुद्रस्य स्वरूपं वक्तुमर्हसि ॥ १ ॥

सूत उवाच—

भूर्भुवःस्वर्महश्चैव जनः साक्षात्तपस्तथा ।
सत्यलोकश्च पातालं नरकार्णवकोटयः ॥ २ ॥

तारकाग्रहसोमार्का ध्रुवः सप्तर्षयस्तथा ।
वैमानिकास्तथान्ये च तिष्ठन्त्यस्य प्रसादतः ॥ ३ ॥

अनेन निर्मितास्त्वेवं तदात्मानो द्विजर्षभाः ।
समष्टिरूपः सर्वात्मा संस्थितः सर्वदा शिवः ॥ ४ ॥

---

1. नृसिंहपुराणम् ३१ अध्यायः ११७ श्लोकः ।
2. नृसिंहपुराणे आनुपूर्वीभेदो दृश्यते ।
3. विष्णुपुराणे द्वितीयांशे अ. ५, श्लो. ३

सर्वात्मानं महात्मानं महादेवं महेश्वरम् ।
न विजानन्ति संमूढा मायया तस्य मोहिताः ॥ ५ ॥

तस्य देवस्य रुद्रस्य शरीरं वै जगत्त्रयम् ।
तस्मात्प्रणम्य तं वक्ष्ये जगतां निर्णयं शुभम् ॥ ६ ॥

पुरा वः कथितं सर्वं मयाण्डस्य यथाकृतिः ।
भुवनानां स्वरूपं च ब्रह्माण्डे कथयाम्यहम् ॥ ७ ॥

पृथिवी चान्तरिक्षं च स्वर्महर्जन एव च ।
तपः सत्यं च सप्तैते लोकास्त्वंडोद्भवाः शुभाः ॥ ८ ॥

अधस्तादत्र चैतेषां द्विजाः सप्ततलानि तु ।
महातलादयस्तेषामधस्तान्नरकाः क्रमात् ॥ ९ ॥

महातलं हेमतलं सर्वरत्नोपशोभितम् ।
प्रासादैश्च विचित्रैश्च भवस्यायतनैस्तथा ॥ १० ॥

अनन्तेन च संयुक्तं मुचुकुंदेन(च)धीमता ।
नृपेण बलिना चैव पातालस्वर्गवासिना ॥ ११ ॥

शैलं रसातलं विप्राः शार्करं हि तलातलम् ।
पीतं सुतलमित्युक्तं वितलं विद्रुमप्रभम् ॥ १२ ॥

सितं हि अतलं तच्च तलं यच्च सितेतरत् ।
क्ष्मायास्तु यावद्विस्तारो ह्यधस्तेषां च सुव्रताः ॥ १३ ॥

तलानां चैव सर्वेषां तावत्संख्या समाहिता ।
सहस्रयोजनं व्योम दशसाहस्रमेव च ॥ १४ ॥

लक्षं सप्तसहस्रं हि तलानां सघनस्य तु ।
व्योम्नः प्रमाणं मूलं तु त्रिंशत्साहस्रकेण तु ॥ १५ ॥

सुवर्णेन मुनिश्रेष्ठास्तथा वासुकिना शुभम् ।
रसातलमिति ख्यातं तथान्यैश्च निषेवितम् ॥ १६ ॥

विरोचनहिरण्याक्षनरकाद्यैश्च सेवितम् ।
तलातलमिति ख्यातं सर्वशोभासमन्वितम् ॥ १७ ॥

वैनायकादिभिश्चैव कालनेमिपुरोगमैः ।
पूर्वदेवैः समाकीर्णं सुतलं च तथापरैः ॥ १८ ॥

वितलं दानवाद्यैश्च तारकाग्निमुखैस्तथा ।
महांतकाद्यैर्नागैश्च प्रह्लादेनासुरेण च ॥ १९ ॥

वितलं चात्र विख्यातं कंबलाश्वनिषेवितम् ।
महाकुम्भेन वीरेण हयग्रीवेण धीमता ॥ २० ॥

शंकुकर्णेन संभिन्नं तथा नमुचिपूर्वकैः ।
तथान्यैर्विविधैर्वीरैस्तलं चैव सुशोभितम् ॥ २१ ॥

तलेषु तेषु सर्वेषु चांबया परमेश्वरः ।
स्कन्देन नन्दिना सार्धं गणपैः सर्वतो वृतः ॥ २२ ॥

तलानां चैव सर्वेषामूर्ध्वतः सप्तसप्तमाः ।
क्ष्मातलानि धरा चापि सप्तधा कथयामि वः ॥ २३ ॥

॥ इति श्रीलिंगपुराणे पूर्वभागे पातालवर्णनं नाम
पञ्चचत्वारिंशोऽध्यायः ॥

वराहपुराणे पञ्चदशेऽध्याये

अतः परं महर्लोकः सपादं लक्षयोजनम् ।
तत्रापीन्द्रः प्रभुर्देवः सेव्यते सर्वदैव हि ॥

कोटिद्वयं पञ्चपादोनं महर्लोकाज्जनस्स्मृतः ।
आधिपत्यं च रुद्रस्य तत्र लोके प्रकीर्तितम् ॥

योजनानां चतुष्कोटिस्तयोर्लोकस्ततः परः ।
ब्रह्मैवाधिपतिस्तत्र सर्वदारैश्च सेवितः ॥

रुद्रोऽप्यधिकृतस्तत्र तत्रस्थाननुशास्ति सः ।
तत्रापीन्द्रादयो देवाः महादेवमुपासते ॥

सह तेनैव यान्त्यूर्ध्वं ब्रह्माणं ते दिदृक्षवः ।
कोटयोऽष्टौ तपोलोकात्सत्यलोकः प्रकीर्त्यते ॥

यत्र ब्रह्मा स्वयं देवैः सदैवोपास्यते भृशम् ।
गंगा तु विरजा तत्र सदा वहति पावनी ॥

मन्दाकिनी ततोऽधस्तात् सैव तन्नामिका स्मृता ।
गंगा भूलोकगा सैव पुनीते पापिनामघम् ॥

भोगावती तु पाताले तत्रस्थाननुपावनी ।
तत ऊर्ध्वं तु मल्लोको वैकुण्ठाख्यो हि वर्तते ॥

षड्विंशल्लक्षहीना तु कोटयो नवति(मि)वन्मिताः ।
पञ्चविंशतिकोट्यस्तु भूलोकादण्डखर्परम् ॥

ऊर्ध्वमूर्ध्वं पुण्यलोकः सर्वतः परिपूरितः ।
न हि स्वल्पोऽपि देशोऽस्ति यत्र लोको न विद्यते ॥
विधानं सर्वजीवानां ब्रह्माण्डमिति कीर्तितम् ।
दशलक्षयोजनानां कटाहघटना स्मृता ॥
वैकुण्ठस्य च विस्तारो यावदण्डकटाहकम् ।
अष्टत्रिंशत्कोटयस्तु योजनानां समन्ततः ।
[1]इति **ब्रह्माण्डपुराणे** शतोत्तरविंशोऽध्यायः ॥

एवं चोपरिलोकानां पञ्चविंशतिकोटयः ।
भूमेरुपरि सम्प्रोक्ताः संख्यां तां च वदाम्यहम् ॥
अर्धकोट्युच्छ्रितः स्वर्गः क्रमादध्यर्धयोजनाः ।
तपोंऽताः परिकीर्त्यन्ते तावद्ध ब्रह्मणः पदम् ॥
ब्रह्मलोकाद्द्विगुणितो वैकुण्ठः परिकीर्तितः ।
षण्णां चैव तु लोकानामन्तराला तु या क्षितिः ॥
स्वर्गलोकस्य भूकन्दमर्धदक्षिणसंमितम् ।
सपादकोटियुक्तं तु मनुर्लोकस्य भूदलम् ॥
सार्धकोटिजनोलोके भूकन्दं परिकीर्तितम् ।
एवं वै तपसः प्रोक्तं सत्यस्यापि तथैव च ॥

---

1. एते श्लोकाः मुद्रितब्रह्माण्डपुराणप्रतीकेषु नोपलभ्यन्ते। प्रामाणिकत्वात प्रकृतविषयसंगतत्वाच्च पुराणपुस्तकान्तरे दृश्येरन्। उपलब्धपाठः यथाशक्ति शोधितः।

सार्धकोटिद्विसंख्याकं मूलालक्षार्धतः क्रमात् ।
पञ्चविंशतिकोट्यस्तु विज्ञेया मानवादिभिः ॥
भूकन्दादुपरि प्रोक्तं वैकुण्ठस्य ततः परम् ।
लक्ष्म्यात्मको महालोको अर्धकोट्या च संमितः ॥
एवं त्रिकोटिसंख्याधो वैकुण्ठस्य प्रकीर्तिता ।
लक्ष्म्यात्मकेन लोकेन संयुक्तं लोकषट्ककम् ॥
पञ्चविंशतिकोट्या च उच्छ्रितं परिकीर्तितम् ।
पूर्वार्धसार्धकोटिश्च दुर्गया परिपालिता ॥
मध्यभागश्च भूदेव्या सदैव परिकीर्तितः ।
अर्धकोटिश्च रमया पाल्यते सुखरूपया ॥
दुर्गात्मके च भूभागे त्वर्धलक्षबिलं शुभम् ।
गम्यते श्रुतिगैः सर्वैः वैकुण्ठश्चापि चोच्यते ॥
एतद्ज्ञात्वा तु भूगोलं यथावदनुवर्णितम् ।
स मुक्तः सर्वबन्धेभ्यो याति विष्णोः परं पदम् ॥ इति ।
ब्रह्माण्डं प्रथमं प्रोक्तं द्वितीयं पाद्ममुच्यते ।
तृतीयं वैष्णवं प्रोक्तं चतुर्थं शैवमुच्यते ॥
ततो भागवतं प्रोक्तं भविष्याख्यं ततः परम् ।
सप्तमं नारदीयं च मार्कण्डेयं तथाष्टमम् ॥
आग्नेयं नवमं पश्चात् ब्राह्मवैवर्तमेव च ।
ततो लैंगं वराहं च ततः स्कान्दमनुत्तमम् ॥

वामनाख्यं ततः कौर्मं मात्स्यं तत्परमुच्यते ।
गारुडाख्यं ततः प्रोक्तं ब्रह्माण्डं तत्परं विदुः ॥
चतुर्लक्षं तु ग्रन्थश्च(स्य)पुराणं मुनिपुङ्गवाः ।
अष्टादशपुराणानां कर्ता सत्यवतीसुतः ।
अष्टादशपुराणानि श्रुत्वा सत्यवतीसुतात् ॥
अन्यान्यपि पुराणानि श्रुत्वा सत्यवतीसुतात् ।
अन्यान्यपि पुराणानि मुनिभिः कीर्तितानि तु ।
आद्यं सनत्कुमारेण प्रोक्तं वेदविदां वराः ।
द्वितीयं नारसिंहाख्यं तृतीयं स्कान्दमेव च ।
चतुर्थं शिवधर्माख्यं दौर्वासं पञ्चमं विदुः ।
षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः ।
अष्टमं वामनं प्रोक्तं ततश्च संज्ञ(?)सेवितम् ।
ततो ब्रह्माण्डसंज्ञं तु वारुणाख्यं ततः परम् ।
ततः कालीपुराणाख्यं वासिष्ठं मुनिपुङ्गवाः ।
ततो वासिष्ठलिङ्गाख्यं साक्षान्माहेश्वरं परम् ।
ततः साम्बपुराणाख्यं ततः सौरं महाद्भुतम् ।
पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परम् ।
भार्गवाख्यं ततः प्रोक्तं सर्वकामार्थसाधकम् ॥ इति ।

अत्र प्रमाणं लिङ्गपुराणे त्रिपञ्चाशे अध्याये ।

[1]त्रिंशल्लक्षं तु मेदिन्याः मुहूर्तेनैव गच्छति ।

1. त्रिंशांशकं तु इति पा.

योजनानां मुहूर्तस्य इमां संख्यां निबोधत ॥
पूर्णा शतसहस्राणामेकत्रिंशत्तु सा स्मृता ।
पञ्चाशच्च तथान्यानि सहस्राण्यधिकानि तु ।
मौहूर्तिकी गतिर्ह्येषा भास्करस्य महात्मनः[1] ॥

इति वचनम् ।

अत्र,

पंचाशच्च तथान्यानि सहस्राण्यधिकानि तु ।

इत्यस्यायमर्थः । पञ्चाशत्सहस्राणि अन्यानि अधिकानि सहस्राणि विंशतिसहस्राणि इति ।

तथाच बृहद्भाष्ये—

सप्तकोटिं च लक्षाणां चतुर्दश च नित्यशः ।
अष्टाविंशत्सहस्रं च सप्तांशशतपंचकम् ॥
सौरो रथस्त्वहोरात्रात्परियाति दिवि स्थितः ॥ इति ।

अत्र सप्तांशशतपंचकम् इत्यस्य पंचानां शतानां यः सप्तमो भागः तत्सहितमित्यर्थः । तत्रैव रथसंचारोऽप्युक्तः 'तत् त्रिभागाधिकं चक्रं मानसोत्तरगं चरेत्' इति ।

अत्र सार्धैकसप्ततियोजनयुक्ताष्टाविंशतिसहस्रसमेतचतुर्दश-लक्षाधिकसप्तकोटिसंख्याकयोजनानीति तच्छब्दार्थः । त्रिभागः तृतीयो भागः, एतदपेक्षया तृतीयभागस्याधिक्ये नवनवकोटयः द्विलक्षाधिक-पंचाशल्लक्षाणि सप्तत्रिंशत्सहस्राणि अष्टाविंशत्यधिकचतुश्शतसंख्याः

1. श्लो.सं. ११-१२-१३ पूर्वार्धम् ।

संपद्यन्ते। तत्रैकपंचाशल्लक्षाधिकनवकोटिसंख्यायाः एव(वं)भागवतादौ निर्णयेन तदधिका(याः अ)ष्टाविंशतियुक्तचतुश्शतसंपन्नसप्तत्रिंशत्-सहस्रसंख्याया अधिकलक्षसंख्यायाः अल्पत्वात् अविवक्षया सर्वं समञ्जसमित्यप्यभियुक्ताः । समुद्रसंख्या सप्तकोटयः २७ लक्षाणि, द्वीपानां सप्तानां १ कोटिः २७ लक्षाणि, एवं च त्रीणि, तद्द्विगुणीकृते सप्तकोटयः तद्द्विगुणं घनोदकम्, एवं च २४ कोटयः ।

वराहपुराणोक्तलोकसंख्या—भूमेरुपरि अन्तरिक्षलोकः लक्ष-योजनोन्नतः, तदुपरि स्वर्गलोकः पंचाशल्लक्षयोजनः, तदुपरि अमरावती पुरी पंचाधिकसप्ततिलक्षयोजनोन्नता, तदुपरिमहर्लोकः पंच-विंशतिलक्षाधिककोटियोजनोन्नतः तदुपरिजनोलोकः पंचविंशतिलक्ष-न्यूनकोटिद्वययोजनोन्नतः तदुपरि तपोलोकः चतुष्कोटियोजनोन्नतः। तदुपरि सत्यलोकः अष्टकोटियोजनोन्नतः तदुपरि वैकुण्ठलोकः षड्विंशल्लक्षयोजनन्यूननवकोटियोजनोन्नतः । एवं मितानां योजनानां गणने पंचविंशतिकोटयः संपद्यन्ते। सार्धकोटिद्वयं प्रोक्तं सप्तलक्षाधिकं तथा । रथाक्षस्य रवेर्मेरोर्मानसोत्तरवर्तिनः ॥ इति ।

विद्व्यासस्रुतस्येदं रामचन्द्राख्यसूरिणः ।
संप्रति स्यति [1]कस्यश्चस्तद्विजानाति माधवः ॥

स्व

इति श्रीसूरीन्द्रश्रीपादशिष्यसुमतीन्द्रतीर्थविरचितः
भूगोलसंग्रहः समाप्तः ॥

---

1. लिखितपुस्तके स्थितमिदं पद्यं प्रतिलेखककृतं स्यात्, अस्पष्टार्थमिति च प्रतीयते ॥ श्रमात् हस्तेन लेखितः इति तृतीय-पादः पूरणीयः इति भाति ।

॥ श्रीः ॥

॥ ॐ श्रीहयग्रीवाय नमः ॥

॥ श्रीवादीन्द्रतीर्थविरचितं भूगोलम् ॥

प्रथमोऽध्यायः

पंचाशत्कोटिविस्तीर्णं भूमण्डलमुदीरितम् ।
तस्यापि मध्यतः संति सप्तद्वीपास्ससागराः ॥ १ ॥

जम्बूप्लक्षाह्वयौ द्वीपौ शाल्मलिश्च तथापरः ।
कुशः क्रौञ्चस्तथा शाकः पुष्करश्चेति सप्तमः ॥ २ ॥

लवणेक्षुसुरासर्पिंदधिक्षीरशुभोदकैः ।
सागरैसप्तभिस्ते तु सममानैः समावृताः ॥ ३ ॥

द्वीपा जम्ब्वादयः पूर्वपूर्वस्माद् द्विगुणोत्तराः ।
आग्नीध्रश्चेध्मजिह्वश्च यज्वबाहुरनन्तरम् ॥ ४ ॥

हिरण्यरेता अपरो घृतपृष्ठस्तु पंचमः ।
मेधातिथिर्वीतिहोत्रः प्रियव्रतसुता इमे ॥ ५ ॥

क्रमेण सप्तद्वीपानामधिपाः समुदीरिताः ।
जम्बूद्वीपः समस्तानामेतेषां मध्यतः स्थितः ॥ ६ ॥

लक्षयोजनविस्तीर्णो मेरुस्तस्यापि मध्यतः ।
चतुराशीतिसाहस्रैर्योजनैस्तस्य चोच्छ्र्यः ॥ ७ ॥

प्रविष्टः षोडशाधस्तात् द्वात्रिंशन्मूर्ध्नि विस्तृतः ।
मूले षोडशसाहस्रविस्तारस्तस्य भूभृतः ॥ ८ ॥

भूपद्मश्चास्ति शैलोऽसौ कर्णिकाकारसंस्थितः ।
दक्षिणांबुधितीरस्थं भारतं प्रथमं स्मृतम् ॥ ९ ॥

किंपूरुषं हरिवर्षं मेरोर्दक्षिणतः स्थितम् ।
रम्यं हिरण्मयं चैव कुरुवर्षं तथोत्तरे ॥ १० ॥

मेरोः पूर्वेण भद्राश्वं केतुमालं तु पश्चिमे ।
इलावृतं तु तन्मध्ये मेरुगर्भमुदीरितम् ॥ ११ ॥

नाभिः किंपुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्मयः षष्ठः कुरुर्भद्राश्व एव च ॥ १२ ॥

केतुमाल इति ख्याताः आग्नीध्रतनया नव ।
वर्षाणां भारताद्यानां पालकास्समुदीरिताः ॥ १३ ॥

धनुर्वत्संस्थिते ज्ञेये वर्षे तद्दक्षिणोत्तरे ।
दीर्घाणि तत्र चत्वारि चतुरस्रमिलावृतम् ॥ १४ ॥

नवसाहस्रविस्तीर्णं दाक्षिणात्यं तथोत्तरम् ।
वर्षं प्रत्येकमाख्यातं चतुर्दिक्ष्वपि मेरुतः ॥ १५ ॥

नवसाहस्रविस्तीर्णमिलावृतमुदीरितम् ।
चतुस्त्रिंशत्सहस्राणि दक्षिणोत्तरमायते ॥ १६ ॥

एकात्रिंशत्सहस्राणि पूर्वपश्चिमतः स्थिते ।
भद्राश्वकेतुमालाख्ये पौर्वपाश्चात्यवर्षके ॥ १७ ॥

हिमवान् हेमकूटश्च निषधश्चास्य दक्षिणे ।
नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्वताः ॥ १८ ॥

लक्षप्रमाणौ द्वौ मध्ये दशहीनास्तथापरे ।
सहस्रद्वितयोच्छ्रायौ तावद्विस्तारिणौ च तौ ॥ १९ ॥

वर्षाणां भारताद्यानां मर्यादागिरयः स्मृताः ।
आनीलनिषधायामौ माल्यवद्गन्धमादनौ ॥ २० ॥

केतुमालाख्यभद्राश्वद्वीपच्छेदकपर्वतौ ।
सहस्रद्वितयोच्छ्रायौ तावद्विस्तारिणावुभौ ॥ २१ ॥

इलावृतस्य मध्येऽपि मेरुविष्टम्भभूधराः ।
योजनायुतविस्तारोन्नाहायत्ताश्चतुर्दिशम् ॥ २२ ॥

पूर्वेण मन्दरो नाम दक्षिणे मेरुमन्दरः ।
सुपार्श्वः पश्चिमे पार्श्वे कुमुदश्चोत्तरे स्मृतः ॥ २३ ॥

तेषु चूततरुर्जम्बूकदम्बौ वट एव च ।
एकादशशतायामास्तावद्विस्तृतशाखिनः ॥ २४ ॥

शतयोजनविस्तीर्णा ह्रदास्तेषु व्यवस्थिताः ।
पयोमध्विक्षुसुरासुशुद्धतोयेन पूरिताः ॥ २५ ॥

संस्पर्शमात्रतो दिव्यदेहतापादकाः स्मृताः । (सदा)
नन्दनं त्वपरं चैत्ररथं वैभ्राजनामकम् ॥ २६ ॥

सर्वतोभद्र इतितेष्वचलेषु वनानि च ।
अरुणोदं महाभद्रं शिशिरोदं समानसम् ॥ २७ ॥

सरांस्येतानि चत्वारि देवभोग्यानि यानि च ।
मंदरोत्संगसंलग्नादेकादशशतोच्छ्रयात् ॥ २८ ॥
पतन्ति चूतवृक्षाग्रादतिस्थूलानि पर्वते । (सर्वशः)
फलानि शीर्यमाणानि सुधाकल्परसानि च ॥ २९ ॥
अरुणोदा नाम नदी पूर्वेलावृतमध्यगात् ।
एकषष्ट्यधिकारत्निशताष्टकमितानि च ॥ ३० ॥
जम्बूफलानि ज्ञेयानि वृक्षाग्रात्पतितानि वै ।
तेषां विशीर्यमाणानां रसोऽमृतमयो भवेत् ॥ ३१ ॥
तद्रसेनावहज्जम्बूनदी विबुधसेविता ।
मेरुमंदरशैलाग्रात् निपतन्ती धरातले ॥ ३२ ॥
जरादिदुरवस्थाघ्नी दक्षिणेलावृतं ययौ ।
सुपार्श्वरूढकादम्बकोटरेभ्यो विनिस्सृताः ॥ ३३ ॥
पञ्चहस्तायताः पञ्च मधुधाराः स्रवन्ति हि ।
पश्चिमेलावृतजनान् मोदयन्ति सुधोपमाः ॥ ३४ ॥
कुमुदाचलसंलग्नवटस्कन्धविनिर्गताः ।
पयोमधुघृतादीनां नदाः कामदुघा अधः ॥ ३५ ॥
पतन्तः कुमुदात्सौम्य मोदयन्ति त्विलावृतम् ।
कुरंगः कुररश्चैव वैकुण्ठोऽथ सुकुम्भकः ॥ ३६ ॥
सु(त्रि)कूट इति पञ्चैते पौरस्त्याः केसराचलाः ।
पतन्ति शिखरोत्संगान्निषधोसीतिवासकः ? ॥ ३७ ॥

एते दक्षिणतः सन्ति पञ्च केसरपर्वताः ।
कपिलःशङ्खवैडूर्यौ जारुधिर्हंससंज्ञकः ॥ ३८ ॥
मेरुपश्चिमदेशस्था वृषभो नागनामकः ।
कालांजनो नारदाख्य उत्तरे केसराचलाः ॥ ३९ ॥
जठरो देवकूटश्च द्विसहस्रपृथून्नतौ ।
अष्टादशसहस्राणि दक्षिणोत्तरमायतौ ॥ ४० ॥
इलावृतप्रदेशेषु मेरोः पूर्वमवस्थितौ ।
एवं पश्चिमभागेऽपि पवनः पारियात्रकः ॥ ४१ ॥
इत्युभौ तिष्ठतो मेरोः दक्षिणस्यां तथा दिशि ।
कैलासकरवीराख्यौ प्राक् पश्चादायतावुभौ ॥ ४२ ॥
एवमुत्तरतः शृङ्गमकरावेवमद्रयः ।
परिस्तरणरूपेण तिष्ठन्त्यष्टौ चतुर्दिशम् ॥ ४३ ॥
योजनायुतविस्तीर्णा ब्रह्मणो मेरुमूर्धनि ।
शतकोटिरितिख्याता शातकुम्भमयी पुरी ॥ ४४ ॥
तस्याः समन्ततश्चाष्टौ दिशासु विदिशासु च ।
इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुरः ॥ ४५ ॥
ब्रह्मपुर्याश्चतुर्थांशपरिमाणयुतास्तु ताः ।
पूर्वामरावती नाम पुरीन्द्रस्य प्रकीर्तिता ॥ ४६ ॥
तेजोवती परा ज्ञेया याम्या संयमनी पुरी ।
र(प्र)क्षोवती राक्षसपूर्निम्लोचन्यथ वारुणी ॥ ४७॥

वायोर्गन्धवती ख्याता पुरी सौम्या विभावरी ।
यशस्विनी भवस्योक्ता चित्रगोपुरतोरणा ॥ ४८ ॥
विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् ।
समन्ताद् ब्रह्मणः पुर्यां गङ्गा पतति पावनी ॥ ४९ ॥
सीता चालकनन्दा च चक्षुर्भद्रेति सा पुनः ।
चतुर्धा प्रविभक्तोदवाहैति सरितां पतिम् ॥ ५० ॥
सीता तु ब्रह्मसदनात् पौरकेसरपर्वतान् ।
अतीत्य पूर्ववर्षेण भद्राश्वेनैति चार्णवम् ॥ ५१ ॥
तथैवालकनन्दापि दक्षिणेनैत्य भारतम् ।
प्रयाति सागरं सप्तभेदयुक्ताघमर्दिनो ॥ ५२ ॥
सुचक्षुः पश्चिमगिरीनतीत्य सकलांस्ततः ।
केतुमालं समभ्येत्य वर्षं सागरमेत्य सा ॥ ५३ ॥
भद्रोत्तरगिरींस्तोर्वा कुरुवर्षेण चार्णवम् ।

॥ इति श्रीवादीन्द्रतीर्थविरचितभूगोले प्रथमोऽध्यायः ॥

द्वितीयोऽध्यायः

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । (णे)
वर्षं तद् भारतं नाम नवसाहस्रविस्तृतम् ॥ १ ॥
कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ।
इतरेषु च वर्षेषु न कर्माधिकृतिर्भवेत् ॥ २ ॥
भौमा ह्येते स्मृताः स्वर्गा भारते कृतकर्मणाम् ।
भारते नारदो भक्त्या नरनारायणं हरिम् ॥ ३ ॥
उपास्ते हनुमान् रामं वर्षे किंपुरुषाह्वये ।
प्रह्लादो हरिवर्षाख्ये नृहरिं भजते, शिवः ॥ ४ ॥
इलावृते महाभक्त्या संकर्षणसमाह्वयम् ।
वैवस्वतो मनुर्मत्स्यं रम्ये, पितृगणाधिपः ॥ ५ ॥
हिरण्मये यमः कूर्मं, भूदेवी कुरुवर्षके ।
उपास्ते यज्ञवाराहं, भद्राश्वे हयमस्तकम् ॥ ६ ॥
भद्रश्रवाः केतुमाले कामरूपं हरिं रमा ।
भजते भारते वर्षे सरितो बहवोऽचलाः ॥ ७ ॥
मलयो मंगलप्रस्थो[1] मैनाकोऽथ त्रिकूटकः ।
ऋषभः सनकः[2] कोलः सह्यःक्रोडमिरिस्तथा[3] ॥ ८ ॥
ऋष्यमूको वेंकटाद्रिः श्रीशैलोऽथ महेन्द्रकः ।
गिरिधाराचलो[4] विंध्यः शुक्तिमान् ऋक्षपर्वतः ॥ ९ ॥

[1]मंगलप्रस्थ; [2]कनकः [3]सिंहो बेदगिरि; [4]वारिधाराचलो

पारियात्राचलो द्रोणः चित्रकूटोऽचलोऽपरः ।
गोवर्धनो रैवताख्यः ककुभो नीलनामकः ॥ १० ॥
गोमुख्याख्यश्चन्द्रनीलः कामाख्यश्चेतिपर्वताः ।
अन्येऽपि बहवः सन्ति तत्र तत्र सहस्रशः ॥ ११ ॥
तेषां नितम्बप्रभवा नद्यः सन्ति नदा अपि ।
नदी ताम्रवतीनाम्नो[1] ताम्रपर्णी वटोदका ॥ १२ ॥
कृतमाला च कावेरी वैहायस्यपरा नदी ।
वेणी च शर्करा वार्ता तुङ्गभद्रा पयस्विनी ॥ १३ ॥
कृष्णवेणी भीमरथी गोदावर्यभिधा नदी ।
निर्विंध्या सुरसा तापी रेवा चर्मण्वती नदी ॥ १४ ॥
पयोष्णीनर्मदानद्यौ सिन्धुशोणौ महानदौ ।
वेदस्मृतिस्त्रिधामाख्या ऋषिमुख्याथ कौशिकी ॥ १५ ॥
मंदाकिनी च यमुना गोमती च दृषद्वती ।
सरस्वती च सरयू रोघवत्यथ[2] शोषणा ॥ १६ ॥
सुशोणासत्यवत्यौ च श(कृ)तमाला मरुद्वृधा ।
चन्द्रभागा शुतुद्री च वितस्ता शुक्तिका तथा ॥ १७ ॥
मलापहाककुद्मत्यौ वेदा च भवनाशिनी ।
विश्वेति च महानद्यः सन्ति लोकाघहारिका:[3] ॥ १८ ॥

इति श्रीवादीन्द्रतीर्थविरचितभूगोले द्वितीयोऽध्यायः ॥

[1]नदी च गोमतीनाम्नी [2]रोधवत्यघशोषणी [3]नाशनाः

तृतीयोऽध्यायः

जम्बूद्वीपसमानेन लवणोदधिनावृतः ।
तस्माद् द्विगुणविस्तीर्णः प्लक्षद्वीप इति स्मृतः ॥ १ ॥
यत्र प्लक्षतरुर्जम्बूसमस्तद्वीपनामकृत् ।
हिरण्मयोऽत्र हुतभुगुपास्ते हरिमव्ययम् ॥ २ ॥
इध्मजिह्वोऽधिपस्तस्य विभज्य स च सप्तधा ।
पुत्रेभ्यो वर्षनामभ्यः प्रायच्छद्विगतस्पृहः ॥ ३ ॥
शिवं यशस्यं परमं सुभद्रं शान्तनामकम् ।
क्षोभाख्यमपरं वर्षमभयाह्वं तु सप्तमम् ॥ ४ ॥
मर्यादागिरयो नद्यस्तत्र सप्तैव संस्थिताः ।
मणिकूटो वज्रकूटो इन्द्रसेनाचलः स्मृतः ॥ ५ ॥
ज्योतिष्मान् धूमवर्णाख्यो हिरण्यग्रीवनामकः ।
मेघमाल इतिख्यातोऽरुणा विमला[1] नदी ॥ ६ ॥
आंगीरसी च सावित्री सुप्रजाता ऋतंभरा ।
सत्यंभरेति सप्तैव नद्यः संति सुशोभनाः ॥ ७ ॥
एतद्द्वीपस्थिताः सूर्यस्थितं हरिमुपासते ।
समानेक्षुरसोदेन प्लक्षद्वीपः समावृतः ॥ ८ ॥
ततो द्विगुणविस्तीर्णः शाल्मलीद्वीप ईरितः ।
तत्रैव शाल्मलीवृक्षा याम्या यस्यां गरुत्मतः ॥ ९ ॥

[1]नामिका

निवासोऽधिपतिस्तस्य यज्ञबाहुर्विभज्य तम् ।
पुत्रनामानि वर्षाणि पुत्रेभ्यः सप्त संददौ ॥ १० ॥

सुरोचनं सौमनस्यं तथा रमणकाह्वयम् ।
देवबर्हं[1] पारिभद्रमभिबर्हमथापरम्[2] ॥ ११ ॥

आप्यायतमितिख्यातं सप्तमं तत्र पर्वताः ।
सुरसः शतशृंगोऽथ वामदेवोऽथ कुंदकः ॥ १२ ॥

मुकुंदः पुष्पवर्षश्च सहश्रुतिरितीरिताः ।
नदी त्वनुमतिर्नाम सिनीवाली सरस्वती ॥ १३ ॥

कुहू रसकुल्या नन्दा राकाख्या सप्तमी नदी ।
तद्द्वीपपुरुषाः सोमगतं हरिमुपासते ॥ १४ ॥

स्वसमानसुरोदेन ह्ययं द्वीपः समावृतः ।
तस्माद् द्विगुणविस्तीर्णः कुशद्वीप उदाहृतः ॥ १५ ॥

कुशस्तंबो देवकृतो यत्र तद्द्वीपनामभृत् ।
हिरण्यरेता अधिपः पुत्रेभ्यः समदात् स्वयम् ॥ १६ ॥

विभज्य सप्तवर्षाणि पुत्रनामांकितानि हि ।
प्रथमं वसुदानाह्वं दृढं च रुचिनामकम् ॥ १७ ॥

रामाभिगुप्तं तु सत्यव्रतं[3] विप्राख्यमेव च ।
वीरदेवस्तेषु सीमागिरयस्तेषु(सप्त)चापगाः ॥ १८ ॥

---

[1]देववर्षं [2]अधिवर्षं [3]नाभिराली तथा

चक्राख्यः[1]कपिलः शृंगः च्छिन्नकूटोऽपरस्तथा ।
देवानीकस्तूर्ध्वरोमा द्रविणः सप्तमः स्मृतः ॥ १९ ॥

रसकुल्या मधुकुल्या च श्रुतविंदाभिधानदी ।
मित्रविंदा वेद(देव)गर्भा घृतच्युतसमाह्वया ॥ २० ॥

मन्त्रमालेतिसरितः सप्तपावनतोयकाः ।
कुशद्वीपस्थिता वह्निस्थितं हरिमुपासते ॥ २१ ॥

कुशद्वीपसमानेन घृतोदेनावृतस्ततः ।
क्रौञ्चद्वीपो द्विगुणितो यत्र क्रौञ्चो महाचलः ॥ २२ ॥

घृतपृष्ठोऽधिपस्तस्य ह्यात्मपो मधुरुहाह्वयः[2] ।
मेदपृष्ठः सुदामाख्यो भ्राजिष्ठो लोहितार्णकः ॥ २३ ॥

वनस्पतिरितिख्याताः पुत्रास्तेभ्यो विभज्य सः ।
सप्तवर्षाणि तन्नाम्ना वाच्यानि प्रददौ नृपः ॥ २४ ॥

शुक्लाख्यो वर्धमानाख्यः उपबर्हणनामकः ।
उपभोजनो नन्दनामा नन्दनश्चापरः स्मृतः ॥ २५ ॥

सर्वतो भद्र इति तेऽवचला वर्षभेदकाः ।
अभया त्वमृतोदाख्या दर्पकाख्या परा स्मृता ॥२६॥

नदी तीर्थवती वृत्तिरूपवत्यभिधा परा ।
पवित्रा शुक्लवत्याख्या नद्यः सप्त वसन्ति हि ॥ २७ ॥

---

[1]रक्ताख्यः [2]मधुसाह्वयः

क्रौञ्चद्वीपगता वारिस्थितं हरिमुपासते ।
क्रौञ्चो दधिसमुद्रेण समानेन समावृतः ॥ २८ ॥

द्वात्रिंशल्लक्षविस्तीर्णः शाकद्वीपस्ततः स्मृतः ।
शाकनामाऽवनिरुहो यत्र तत् क्षेत्रनामकृत् ॥ २९ ॥

पतिर्मेधातिथिस्तस्य सप्तवर्षाण्यदात्स्वयम् ।
तन्नामांकितपुत्रेभ्यः पुरोजव[1] मनोजवौ ॥ ३० ॥

वेपमानाभिधो धूम्रानीकाख्यश्चित्ररेफकः[2] ।
बहुरूपो विश्वधारो मेधातिथिसुता इमे ॥ ३१ ॥

ईशान उरुशृङ्गाख्यो बलभद्राभिधस्तथा ।
शतकेसरसाहस्रौ देवपालो महासनः ॥ ३२ ॥

एते वर्षाचलास्तत्र तथायुर्दा नदी मुदा ।
उपपस्पृष्टिरपरा जिता पञ्चपदी तथा ॥ ३३ ॥

सहस्मृतिर्निजधृतिः नद्यः सप्तेति संस्थिताः ।
भजन्ते तद्वर्षजना वायुस्थितरमापतिम् ॥ ३४ ॥

शाकद्वीपस्तत्प्रमाणः क्षीरवारिधिना वृतः ।
ततो द्विगुणविस्तीर्णः पुष्करद्वीप आस्थितः ॥ ३५ ॥

स्वर्णपत्रच्युतस्तत्र[3] बृहत्पुष्करमास्थितम् ।
मानसोत्तरशैलेऽस्मिन् वलयाकृतिरास्थितः ॥ ३६ ॥

---

[1]उशसना [2]नीकश्चित्रसुरेशकः इति पाठः [3]वृषभत्रययुतं तस्मिन्

अर्वाचीनपराचीनवर्षद्वयविभाजकः ।
अयुतयोजनविस्तीर्णः तावतैव समुच्छ्रितः[1] ॥ ३७ ॥

इन्द्रादिलोकपालाश्च चतुर्दिशमवस्थिताः ।
पुनश्च तत्र सूर्यस्य रथचक्रमवस्थितम् ॥ ३८ ॥

वीतिहोत्रोऽधिपस्तस्य वर्षद्वयमदान्नृपः ।
स्वर्गधौतकनामभ्यां पुत्राभ्यां तत्र संस्थिताः ॥ ३९ ॥

चतुर्मुखगतं विष्णुं भजंते परमादरात् ।
एष स्वतुल्यशुद्धोदसमुद्रेण समावृतः ॥ ४० ॥

चतुर्लक्षविहीनैककोटिः स्वर्णावनिस्ततः ।
लोकालोकाचलस्तस्मात्पंचाशल्लक्षविस्तृतः ॥ ४१ ॥

सपंचाशत्सहस्रश्च लोकालोकोत्तरांगणम्[2] ।
तमस्ततो लक्षहीनैः कोटिसप्तकमावृतम् ॥ ४२ ॥

घनोदकं तद्द्विगुणं तदन्ते धाम वैष्णवम् ।
मेरोश्चतुर्दिशं त्वेवं कोटयः पंचविंशतिः ॥ ४३ ॥

॥ इति श्रीवादीन्द्रतीर्थविरचितभूगोले तृतीयोऽध्यायः ॥

---

[1]समन्ततः [2]लोकालोकान्ततल्पगाः

चतुर्थोऽध्यायः

यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं च ऋषिभाषितम् ।
दूषयेदनभिज्ञाय स भवेद् ब्रह्मघातकः ॥ १ ॥

रविचन्द्रमसोर्यावन्मयूखैरवभास्यते ।
ससमुद्रसरिच्छैला तावती पृथिवी स्मृता ॥ २ ॥

यावत्प्रमाणा पृथिवी विस्तारपरिमण्डलात् ।
नभस्तावत्प्रमाणं[1] वै व्यासमण्डलतो द्विज ॥ ३ ॥

सौरं शतसहस्रं तु योजनानां निशाकरात् ।
नक्षत्रमंडलं कृत्स्नमुपरिष्टात् प्रकाशते ॥ ४ ॥

द्वे लक्षे योजनोत्तरे ब्रह्मन् बुधो नक्षत्रमंडलात् ।
तावत्प्रमाणभागे तु बुधस्याप्युशनाःस्थितः ॥ ५ ॥

अंगारकोऽपि शुक्रस्य तत्प्रमाणे व्यवस्थितः ।
लक्षद्वये तु भौमस्य स्थितो देवपुरोहितः ॥ ६ ॥

सौरिर्बृहस्पतेरूर्ध्वं द्विलक्षे समवस्थितः ।
सप्तर्षिमंडलं तस्माल्लक्षमेकं द्विजोत्तम ॥ ७ ॥

ऋषिभ्यस्तु सहस्राणां शतादूर्ध्वं व्यवस्थितः ।
मेढीभूतस्समस्तस्य ज्योतिश्चक्रस्य वै ध्रुवः ॥ ८ ॥

ध्रुवादूर्ध्वं महर्लोकः यत्र ते कल्पवासिनः ।
एकयोजनकोटिस्तु महर्लोकोऽभिधीयते ॥ ९ ॥

[1]नभः=भुवर्लोकः

द्विकोटिस्तु जनोलोको यत्र ते ब्रह्मणः सुताः ।
सनंदनाद्यास्तिष्ठन्ति मैत्रेयामलचेतसः ॥ १० ॥

चतुर्गुणोत्तरे चोर्ध्वं जनोलोकात् तपःस्मृतम् ।
वैराजा यत्र ते देवाः स्थिता दाहविवर्जिताः ॥ ११ ॥

षड्गुणेन तपोलोकात् सत्यलोको विराजते ।
अपुनर्मारका यत्र ब्रह्मलोको हि स स्मृतः ॥ १२ ॥

अन्तरिक्षं त्वया प्रोक्तं लक्षयोजनमुच्छ्रितम् ।
अर्धकोट्युच्छ्रितः स्वर्गः विमानावलिसंकुलः ॥

भूर्भुवः स्वर्गश्च कोऽप्येष योजनानां प्रविस्तृतौ ।
महर्जनस्तपश्चैव क्रमादध्यर्धयोजनाः ॥

पंचाशत्कोटिविस्तारो योजनानां प्रविस्तृतौ

॥ इति श्रीवादीन्द्रतीर्थविरचितभूगोले चतुर्थोऽध्यायः ॥

॥ ग्रन्थश्चायं संपूर्णः ॥

NOTICE

Mantralaya Sri Raghavendraswamy Mutt's Sri Gurusarvabhouma Vidyapeetha Oriental Library has already established a big Library and collected a large number of Manuscripts, Palm-leaf Granthas and Printed Books thereby helping the interested people.

Now it is requested that if in any of your house, friends', relatives' and known people's house, (1) Palm-leaf Granthas (2) Hand written Granthas (3) Old Printed Books (4) Old Panchangas (5) Religious Magazines (6) Old Rayasas (Ajna Patras) (7) Copper Plates (Tamra Shasanas)—are found, they may be handed over to this library free of cost. If it is not possible to give free of cost, the Granthas etc., will be purchased by giving suitable Price. You are requested to render this seva yourself and request others with a liberal mind and get the blessings of Sri Raghavendra Gururaja.

Your Seva to this Library stands eternal. Since lakhs of people from different places visit this Kshetra, your names get publicity. The Granthas will be Printed and Published with the names of donors. By your help, Granthas of immense value will come to light. Receipts will be given for donating the Scripts, Books, Granthas etc. Donors of this type to Sri Gururaja-Sannidhi will obtain great Punya.

Address to which the Granthas etc., are to be given:

Adhyaksha
Sri Gurusarvabhouma
Samskrita Vidyapeetham
Mantralaya–518345
STD Code: 08512
Phone: 59496

प्रकटिष्यमाणग्रन्थाः

१ अद्वैतशिक्षा
२ सुधापरिमलः
३ सर्वमूलम्
४ मन्त्ररत्नकोशः
५ गीताभावरत्नकोशः
६ तत्वप्रकाशिका-
भावरत्नकोशः
७ मन्त्रार्थमञ्जरी
८ न्यायमुक्तावलिः
९ कुलिशः
१० कृष्णामृतमहार्णवव्याख्या
११ गीताभाष्यटीकाव्याख्या
(श्रीराघवेन्द्रतीर्थीया)
१२ गीताभाष्य-
नरहरितीर्थीया टीका
१३ गीताभाष्य-
पद्मनाभतीर्थीया टीका
१४ अर्थालङ्कारमञ्जरी
१५ सारस्वतप्रपञ्चके
विद्यामठद कोडुगे (कन्नड)
१६ द्वैतकोशः
१७ मन्दनन्दिनी
१८ बृहद्धातुकोशः
१९ भागवतटीका
(श्रीसुधीन्द्रतीर्थीया)
२० श्रुत्यर्थसारः
२१ न्यायमौक्तिकमाला
२२ वादनक्षत्रमालिका
२३ विनायकादिपूजापद्धतिः